# panchashlokigaNeshapurANam

# પંચશ્લોકિગણેશપુરાણમ્

## Document Information

Text title : pa.nchashlokIgaNeshapurANam

File name : panchashlokigaNeshapurANa.itx

Category : panchaka, ganesha

Location : doc_ganesha

Author : Traditional

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : May 6, 2004

Send corrections to : sanskrit at cheerful dot c om


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# પંચશ્લોકિગણેશપુરાણમ્

શ્રીવિઘ્નેશપુરાણસારમુદિતં વ્યાસાય ધાત્રા પુરા
તત્ખણ્ડં પ્રથમં મહાગણપતેશ્ચોપાસનાખ્યં યથા ।
સંહર્તું ત્રિપુરં શિવેન ગણપસ્યાદૌ કૃતં પૂજનં
કર્તું સૃષ્ટિમિમાં સ્તુતઃ સ વિધિના વ્યાસેન બુદ્ધ્યાપ્તયે ॥ ૧॥

સઙ્કષ્ટ્યાશ્ચ વિનાયકસ્ય ચ મનોઃ સ્થાનસ્ય તીર્થસ્ય વૈ
દૂર્વાણાં મહિમેતિ ભક્તિચરિતં તત્પાર્થિવસ્યાર્ચનમ્ ।
તેભ્યો યૈર્યદભીપ્સિતં ગણપતિસ્તત્તત્પ્રતુષ્ટો દદૌ
તાઃ સર્વા ન સમર્થ એવ કથિતું બ્રહ્મા કુતો માનવઃ ॥ ૨॥

ક્રીડાકાણ્ડમથો વદે કૃતયુગે શ્વેતચ્છવિઃ કાશ્યપઃ
સિંહાઙ્કઃ સ વિનાયકો દશભુજો ભૂત્વાથ કાશીં યયૌ ।
હત્વા તત્ર નરાન્તકં તદનુજં દેવાન્તકં દાનવં
ત્રેતાયાં શિવનન્દનો રસભુજો જાતો મયૂરધ્વજઃ ॥ ૩॥

હત્વા તં કમલાસુરં ચ સગણં સિન્ધું મહાદૈત્યપં
પશ્ચાત્ સિદ્ધિમતી સુતે કમલજસ્તસ્મૈ ચ જ્ઞાનં દદૌ ।
દ્વાપારે તુ ગજાનનો યુગભુજો ગૌરીસુતઃ સિન્દુરં
સમ્મર્દ્ય સ્વકરેણ તં નિજમુખે ચાખુધ્વજો લિપ્તવાન્ ॥ ૪॥

ગીતાયા ઉપદેશ એવ હિ કૃતો રાજ્ઞે વરેણ્યાય વૈ
તુષ્ટાયાથ ચ ધૂમ્રકેતુરભિધો વિપ્રઃ સધર્મર્ધિકઃ ।
અશ્વાઙ્કો દ્વિભુજો સિતો ગણપતિર્મ્લેચ્છાન્તકઃ સ્વર્ણદઃ
ક્રીડાકાણ્ડમિદં ગણસ્ય હરિણા પ્રોક્તં વિધાત્રે પુરા ॥ ૫॥

એતચ્છ્લોકસુપઞ્ચકં પ્રતિદિનં ભક્ત્યા પઠેદ્યઃ પુમાન્ ।
નિર્વાણં પરમં વ્રજેત્ સ સકલાન્ ભુક્ત્વા સુભોગાનપિ ॥

॥ ઇતિ શ્રીપંચશ્લોકિગણેશપુરાણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar at hotmail.com

*panchashlokigaNeshapurANam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*